# भूमिका

विश्वेषु सर्वप्राचीना संस्कृतिः भारतीयसंस्कृतिः विद्यते। यतोहि अस्या संस्कृतौ जीवकल्याणाय प्रवर्धनाय संपोषणाय च इयं संस्कृतिः विद्यते। तर्हि का नाम संस्कृतिः ? किं तस्याः स्वरूपम् ? तत्र कथ्यते यत् संस्कृतिः संस्करण मनसः आत्मनो वा इति संस्कृतिः। सम् पूर्वक कृ धातोः क्तिन् प्रत्ययेन इदं रूपं सिद्धयते। मानव मनसो अज्ञानं अपनयति। संस्कृतिः चित्तभ्रममपहरति, संहरति च विद्यातमः, प्रकाशयति च ज्ञानज्योतिः।

संस्कृतिमन्तरा न कोऽपि मानवः समाजो वा शान्तिमधिगन्तुम् समर्थः। संस्कृतिः एव मानवस्य क्षेमकरी, जीवनसंचालिका, स्वान्तः सुखदायिका च विद्यते।

संस्कृतिः एव खलु निखिलातिशयि गरिष्ठगुणगरिमा समस्तविश्व संस्कृतिवियन् मण्डले सावित्रं ज्योतिरिव देदीप्यते भारतीया संस्कृतिः।

अस्माकं संस्कृते अंगभूताः विषयाः वरीवृत्यन्ते – धार्मिकी भावना, सदाचारः, पारलौकिकी भावना, आध्यत्मिकी भावना, वर्णव्यवस्था, आश्रम व्यवस्था, वैदिकधर्मनिष्ठा, पुनर्जनमवादः, मोक्षप्राप्तिः तथा अभ्यतत्वभावना च।

वेद प्रतिपादिताखिल कर्मप्रतिपत्यर्थं ब्राह्मणग्रनीानां उदयः अभवत्। वैकिदधर्मः विश्वहिताय मानवहिताय च प्रवर्तितः। विश्वहितस्य विश्व उन्नतेश्च सर्वाभावना भारतीसंस्कृतौ एव उपलभ्यते। अनेन कारणेन अस्माकं आचार्यैः भारतीय आध्यात्मविदिभः ससूक्ष प्रतिभया वैदिकसिद्धान्तश्च निदर्शनं स्व–स्वसिद्धान्ते निरूपितम्।
भारतीयदर्शने विविधाचार्याणां सिद्धान्तः प्रकटितः। संस्कृतसाहित्ये वैदिकसाहित्यमतीव श्रेयस्करं वर्तते।

वेदादारभ्य अद्यावधि पर्यन्तं समस्तसंस्कृतसाहित्यम् उत्तरोतरं वृद्धिकरं जायते। संस्कृतवा›मये दर्शनशास्त्रस्य अतीव–महत्वं वर्तते। येन तत्वं दृश्यते तद्दर्शनम्। भारतीयदर्शनं सर्वेभ्योऽपि दर्शनेभ्यः प्राचीनतमम्। अस्य बीजं तु वेदसंहितासु एव दृश्यते। तथैव ब्राह्मणग्रन्थेषु आरण्यकग्रन्थेषु च यत्किञ्चित् बींज लक्ष्यते। उपनिषदसाहित्यं तु दर्शनस्य मौलिकभूमिः।

भारतीयदर्शनेषु षड्विभागाः सन्ति। अस्य शास्त्रस्य जीवने अतीव–महत्वं वर्तते। गूढ़तमस्य प्रपञ्चस्य, सरहस्यस्य समाधान –पदार्थकमिदं शास्त्रमस्ति।

मनुष्यः स्वभावेन एव मननशीलः। "मनुष्यः कस्मात् मत्वा कर्माणि सीव्यति इति।"[1] यदा जनः चिन्तयति कोऽहं ? कुतोऽहं ? कस्मादहं ? इति चिन्तनमननयोः परिणतिः एव दर्शनशास्त्रम्।

षड्संज्ञकानि दर्शनानि सन्ति। न्याय–वैशेषिक–सांख्य–योग–मीमांसादीनि। इमान्यास्तिकानि सन्ति त्रीणि नास्तिक सम्मतानि चेति। प्रथमेहि वेद प्रामाणं स्वीक्रियते, द्वितीये च वेद रहितानि। तत्र षड्दर्शनेषु वेदान्तदर्शनम् मूर्धन्यमस्ति।

अस्मिन् वाङ्मये दर्शनशास्त्रस्य अन्यतमम स्थानमस्ति। यतोहि तत्र जीवः ब्रह्ममयोर्विषये धर्मकर्मणोः विषये, भक्तिज्ञान विषयोश्च चिन्तनम् वर्तते। मानवजीवनस्य अङ्गीभूतम् धर्म–कर्म–क्रियादीनां सहयोगः दरीदृश्यते।

## वेदान्तदर्शनम् –

वेदान्तदर्शनं वेदोपनिषद् ब्रह्मसूत्रं भगवद्गीतादिग्रन्थाधारितं स्वीक्रियते।"वेदान्तानामोपनिषद प्रमाणम्"[2] इति। अस्य दर्शनस्य उपजीव्या उपनिषदः एव। भगवतः बादरायणस्य ब्रह्मसूत्रं प्रसिद्धम्। अस्मिन् ग्रन्थे चत्वारोऽध्यायाः सन्ति –

**1.**समन्वयाध्यायः, **2.**अविरोधाध्यायः, **3.**साधनाध्यायः, **4.**फलाध्यायश्चेति। वेदान्तदर्शनस्य प्रमुखो प्रतिपादकः श्रीमदादिशङ्कराचार्यः, यस्य भाष्यनाम शारीरिकमिति। अद्वैतवादः प्रसिद्धः वर्तते। तत्र ब्रह्मैव कारणं एतदितिरिक्तं सर्वं नाशशीलम्। अस्मिन् सिद्धान्ते नित्य–शुद्ध–मुक्त–स्वभावस्य– स्वप्रकाशस्य–चिद्रूपस्य–ब्रह्मणः–माया अविद्यादि उपाधिना कुण्ठितप्रकाश –तत्वम् अस›स्य च तस्य आकाशादि प्रपञ्चजनकत्वञ्च स्वीकृतम्।

---

1. निरुक्त–3/8/2
2. वेदान्तसार

वेदान्ते अनेके वादः प्रसिद्धाः अभवन्। तद्यथा –

| क्रमः | आचार्यनाम | मतम् /वादः |
|---|---|---|
| 1. | श्रीशङ्कराचार्यस्य | अद्वैतवादः |
| 2. | श्रीरामानुजाचार्यस्य | विशिष्टाद्वैतवादः |
| 3. | श्रीमध्वाचार्यस्य | द्वैतवादः |
| 4. | श्रीनिम्बार्काचायस्य | द्वैताद्वैतवादः |
| 5. | श्रीवल्लभाचार्यस्य | शुद्धाद्वैतवादश्च इति। |

एतेषां वादानामनेके आचार्याणां स्वातन्त्र्येण च अनेके ग्रन्थाः प्रसिद्धाः सन्ति।

## शुद्धाद्वैतसिद्धान्तः (वल्लभदर्शनम् )

श्रीमद्वल्लभाचार्याणां दार्शनिकसिद्धान्तः 'शुद्धाद्वैतनाम्ना' प्रसिद्धः। एषां नयेन ब्रह्ममायालिप्तया नितान्तशुद्धं पदमालम्बते। इदमञ्च मायासम्बन्ध –रहितं ब्रह्मनाद्वैतम्। अतः मतमेषां शुद्धाद्वैतमिति सम्प्रदाये प्रख्यातम्। उक्तञ्च ––

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः।।
मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः।
कार्यकारणरूपं हि ब्रह्म शुद्धममायिकम्।।[1]

अस्मिन् वल्लभनये ब्रह्मणः सर्वधर्मविशिष्टतत्वमङ्गीकृतम्। अतएव तस्य विरुद्धधर्माश्रयत्वम्। अद्वैतवादिनां निर्गुणं निर्विशेषानिधर्मकञ्च ब्रह्म, मायासम्पर्कात् यत् सगुणत्वादिवदाभासते, तद्वल्लभा न सहन्ते।

## पुष्टिमार्गः –

आचार्याणामाचारमार्गः एव पुष्टिमार्गः उच्यते। पुष्टिशब्दश्चानु –ग्रहवचनः प्रोषणं तदनुग्रहः' मुक्तिम्प्रति प्रमुखकारणता चानुग्रहस्यैववेति[2] वल्लभसम्प्रदायोऽयं पुष्टिमार्गमिति पदप्यपदेशभाक्। वल्लभा मन्यन्ते यदस्ति मर्यादामार्गपुष्टिमार्गयोः नितरां भेदः अक्षरब्रह्मणो वाणीतो निःसृतत्वात्

---

1. शुद्धा. मार्तण्ड–27–28          2. भा.–2/10/4

मर्यादामार्गोऽयं वैदिकः खलु। परं पुष्टिमार्गस्तु भगवतः पुरुषोत्तमस्य वपुषो निर्गतत्वात् सुतरां तद्विलक्षणः। मर्यादामार्गे ज्ञान–श्रवणादि–साधनद्वारा सायुज्यमुपलभ्यते। परन्तु पुष्टिमार्गे सर्वात्मनात्मसमर्पणेन विप्रयोगरसात्मक–प्रीति–साचित्येन साक्षात् आनन्द– धाम्नोः भगवतो ब्रह्मणोऽमृतत्वप्राप्तिः। तथा च प्राह आचार्योऽपि अणुभाष्ये 'पुष्टिमार्गेऽङ्गीकृतस्य ज्ञानादिनैरप्यपेक्ष्यमर्यादा–मङ्गीकृतस्य तु तद्पेक्षितत्वं तु युक्तमे।[1] पुष्टिमार्गोऽनुभवैकसाध्यः प्रमाणमार्गाद्विलक्षणः इति।[2]

पोषणं तदनुग्रह इति कृष्णानुग्रहरूपा हि पुष्टिः कालाधिबाधिका। सा च विलक्षणा लौकिकालौकिकफलसाधिका। पुष्टिभक्तिश्चतुर्धा –1.प्रवाहः 2.मर्यादा 3.पुष्टिः 4.शुद्धभेदात्।

पुष्ट्या विमिश्रा सर्वज्ञाः प्रवाहेणक्रियारताः।
मर्यादया गुणज्ञास्ते वृणुते तेन लभ्यः।।

अत्र यमेवैष वृणुते तेन लभ्यः' इति वेदवाक्याद् यस्मिन् हि भगवत्कृपा स एवास्य विलक्षणपुष्टिमार्गस्याधिकारी। श्रीमद्वल्लभाचार्येण श्रीमद्भाग– वतस्य आध्यात्मतत्वमाधारी कत्यैव एषः पुष्टिमार्गः प्रतिष्ठापितः।

**कर्मकाण्डविषयः –**

वेदेषु एकलक्षमन्त्राः स्वीकुर्वन्ति। तत्र कर्मकाण्डविषयकः अशीतिसहस्र मन्त्राः सन्ति। यतोहि जन्मतः मृत्युपर्यन्तं यानि–यानि कार्याणि भवन्ति तत्र सर्वे कर्मकाण्डस्य विषयाः स्वीकुर्वन्ति। एतद्रिक्तं यजनयाजनयोः पूजानादिकं सर्वेषां देवाना पूजने–अर्चने च कर्मकाण्डस्यैव कार्यं भवति। अपि च मनुष्यस्य जीवनसम्बन्धिकार्येषु यथा वास्तुपूजनं षोडशसंस्कारः इत्यादिषु कार्येषु कर्मकाण्डस्यैव पद्धतिः भवति। अनेन कारणेन कर्मकाण्डस्य अनेके विषयाः सन्ति।

**कर्मकाण्डशब्दस्य निष्पत्तिः –**

'कनी दीप्तौ धातो कमुकान्तौ धतौः' अमन्ताऽऽ'' क्वादिभ्यः[3]

---

1. अणुभाष्य–3/3/21 2.अणुभाष्य–4/4/9 3.अमर.–3/112

अनुनासिक्य दीर्घकाण्डशब्दस्य निष्पत्तिः।
काण्डं चावसरे वाणे नाले स्कन्धे च शाखिनाम्।
स्तम्बे रहसि वर्गे च इति धरणिः।।

काण्डे स्तम्बे तरुस्कन्धे बाणे वसनीरयोः।
कुत्सिते वृक्षाभिन्नाड़ी रहसिवृन्दे नास्त्रियाम्।।[1]

काण्डः काण्डम् – कण+ऽ दीर्घः। इयमपि निष्पत्ति स्वीक्रियते। अस्य शब्दस्य अनेके अर्थाः सन्ति। यथा (ग्रन्थस्य भागः, समूहः, अंशः, दण्डम्, जलम्, अवसरः, इत्यादयः।)

**<u>कर्मकाण्डस्य पर्यायाः –</u>**

कर्मकाण्डस्य अनेकेपर्यायशब्दाः सन्ति। पौरोहित्य, देवार्चनं, याजनं, याज्ञयागादिकमित। चतुर्वेदेषु लक्षपरिमिताः मन्त्राः सन्ति। तत्र 80000 मन्त्राः कर्मकाण्डस्य, षोडशसहस्रात्मकाः मन्त्राः उपासनाकाण्डस्य, चतुः सहस्रात्मकाः मन्त्राः ज्ञानकाण्डस्य सन्ति। अनेन ज्ञायते मनुष्यस्य जीवने कर्मकाण्डस्य अतीव महत्वम् वर्तते। यथा मीमांसासूत्रे कथितमस्ति – ''आम्नायस्य क्रियार्थत्वात्'' [2]
तदेवं तादृशविधिवचनानुष्ठानेनैव जनः निःश्रेयसः लभते। स्वर्गकामो यजत् इत्यत्र यजेदित्यादिविधौ यत् तादृशकर्मानुष्ठानम् प्रति या प्रेरणा उत्पद्यते तदेव कर्मरूपेण व्यपिदृश्यते।

वैदिकविध्यानुसारेण देवपूजानादिकं तदेवं कर्मकाण्डकर्म इति कथ्यते। वेदविहितकर्मानुष्ठानेन लोके कर्मफलप्राप्तिः भवति। अतएव कर्मकाण्डस्य पौरोहित्यस्य वा अद्यापि अत्यन्तं महत्वं दृश्यते।

**<u>वैदिकसम्प्रदायेषु कर्मकाण्डम् –</u>**

सनातनधर्मावलम्बिनां ये सम्प्रदायाः सन्ति तत्र पूर्वोक्ताचार्याणां (शङ्करवल्लभादीनां) एव समावेशः। ते सर्वे वैदिकसम्प्रदायाः सन्ति। सर्वेषु वैदिकसम्प्रदायेषु याः कर्मकाण्डविषयकाः क्रियाः भवन्ति ताः कर्मकाण्डाश्रिताः सन्ति। तत्र वैदिकमन्त्राणां पूजने अर्चने वन्दने वा प्रयुज्यते जनैः।

---

1. मेदिनी–40/203 2.मीमांसा–1/2/1

अस्य विषयस्य विधिनिर्देशकाः अनेके ग्रन्थाः प्रसिद्धाः सन्ति। किन्तु सम्प्रदायाधारिताः कर्मकाण्डविषयकाः ग्रन्थाः न्यूना सन्ति। अनेन कारणेन कस्मिन् सम्प्रदाये कीदृशं कार्यं कर्मकाण्डरूपेण स्वीक्रियते, तदावश्यकता सम्प्रति वर्तते।

## शुद्धाद्वैतसम्प्रदाये (पुष्टिसम्प्रदाये) कर्मकाण्डस्यस्वरूपम् –

अस्मिन् सम्प्रदाये अनेकविधरूपेण वैदिककर्माणि भवन्ति। किन्तु तानि आचार्याज्ञातानि सन्ति। अस्मिन् विषये मौलिकरूपेण केनापि स्वातन्त्र्येण अनुसंधानं शोधकार्यं वा नैव कृतम्। यत्र–तत्र केचित् निबन्धाः सन्ति। मार्गदर्शिकारूपेण केचित् आचार्यवर्याः कार्यं कृतवन्तश्चेति यथा–गो.श्री.चन्द्रगोपालजीमहाराजाः अनेके ग्रन्थाः गौर्जर्यां–हिन्द्याम् वा पुस्ताकनि लिखितवन्तः तथापि संस्कृतभाषायां सम्प्रदायेऽस्मिन् अन्वेषणात्मकं शोधकार्यं नैव अभवत्।

मया शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य महत्वं स्वरूपञ्च अति विषयं स्वीकृत्य महता प्रयत्नेन शोधप्रबन्धः लिखितः। अस्य विषयस्य पञ्चषु प्रकरणेषु कृतमिति।

# कृतज्ञता–ज्ञापनम्

अस्मिन् शोधप्रबन्धे यानि कार्याणि मया कृतानि तत्रापि अनेके महानुभावाः मदीया सहायता कृता। तेषां समेषां उपकारभारं वहामि। तद्यथा–

प्रथमेहि भगवतः कृष्णस्य कृपा प्रसादादेव अयं परिपूर्णो जाता। अनेन कारणेन अस्य विषयस्य सम्पादनाय मया वडोदरासंस्कृत–महाविद्यालयस्य प्राक्तन प्राचार्याणां डॉ. हरिप्रसादपाण्डेय महाभागानां समक्षे प्रस्तावः प्रस्तुतः। भगवतकृपया तैः महाभागैः स्वीकृतिः दत्ता तथा च तेन मार्गदर्शनेनानुसारेण मय अयं शोधप्रबन्धः पूर्णः कृतः। दौर्भाग्येन अद्य ते पाञ्चभौतिकशरीररूपेण विद्यमानाः न सन्ति तेषां चरणकमलयोः सादरं प्रणतिः।

विश्वविद्यालयस्य नियमानुसारेण मार्गदर्शकस्य परिवर्तन विधौ समयः जातः तथापि अस्य महाविद्यालयस्यैव डॉ. सुरेशभाई वी. पटेल मम मार्गदर्शकरूपेण स्वीकृतः। अत एव अस्मिन् शोधप्रबन्धे ये बिन्दवः शीर्षकाः विषयाश्च सन्ति ते सर्वे पटेलमहोदय महाभागानां कार्तग्यं शिरसाविर्भमि।

अस्य शोधप्रबन्धस्य परिपूर्णश्रृंखलायां नैकानां विदुषाम् आचार्याणां, अध्यापकानां सुहृदवर्याणां च सहयोगः सम्प्राप्तः। अनेन कारणेन तेषां समेषां कार्तग्यं प्रणामाञ्जलिं च समर्पयामि।

अस्य महाविद्यालयस्य प्राचार्यः अध्यक्षाय च सविनयं कार्तग्यं ज्ञापयामि। अनेन सह अध्ययन–अध्यापने काऽपि समस्या भवति चेत् तदा तस्याः समाधानं आचार्याः एव कुर्वन्ति। तेन माध्यमेन एतादृशः शोधप्रबन्धः मया निबद्धः। तेषां आचार्याणां गो. चन्द्रगोपालमहाभागानां, गो.. श्रीषष्ठपीठाधीश्वर द्वारकेशलालजी महाभागानां तथा च अस्माकं गुरुणां ऋणं च अहं कदापि पूरयितुं न शक्नोमि तथैव मम सुहृदवर्याणां डॉ.

राजदेवमिश्र महाभाागानामपि सहयोगस्य स्वीकृत्य कार्तग्यं व्यापयामि। अन्ये च मया सह सर्वे सहाध्यायिनः मम सहायकभूताः सन्ति अपि च पारिवारिक –जनेषु मातृपितृचरणाः अपि वन्दनीयाः सन्ति। पित्रोः आशीर्वादानन्तरं जीवनस्य सफलतायै शक्तिस्वरूपायाः कान्तायाः अर्धाङ्गिनीरूपायाः रागिनी अर्धाङ्गिन्याः अस्मिन् कार्ये अपि तस्य स्वाध्यायसम्बन्धिनीरुचिः मम प्रेरणायाः स्रोतरूपायाः गृहकार्यात् मां दूरीकृत्य अस्मै कार्याय प्रेरिता। अतः तां प्रति स्वकीयं कार्तज्ञं विज्ञापयामि। अतः परं मम सन्ततेः भव्या–मुदितेभ्यः योगदानाय भूयांसि आशीर्वचांसि।

मम सेवास्थले सतत मार्गदर्शकरूपेण प्रेरकस्वरूपं अध्यापितानां सर्वेषां गुरुणां अभिवादनं विधाय अस्य शोधकार्यस्य लेखने येषां मार्गदर्शनं काले अभवत् तादृशः डॉ. रामपालशुक्लमहाभागः, बरोडासंस्कृतमहाविद्यालये अध्यक्ष पदारूढ़ः तां प्रणतिं विधाय अस्य कार्यस्य प्रेरकः अभिवन्द्याः।

अस्मिन् प्रसङ्गे अस्य कार्यस्य सहभागिनः मम कार्यस्थलस्य अध्यापकमित्राणि तथा च प्रत्यक्ष परोक्षरूपेण च येषां सहायम् अत्र वर्तते तान् सर्वान् अभिवन्द्य भगवतः कृष्णस्य चरणयोः स्वकीयां वागभ्यर्थनां समर्प्य विरमामि।